

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## पञ्चमकाण्डे सप्तमः प्रश्नः

### उपानुवाक्यावशिष्ट कर्मनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यो वा अय॑थादेवतम॒ग्निञ्चि॑नु॒त आ दे॒वता᳚भ्यो वृश्च्यते पापी॑यान् भवति॒ यो य॑थादे॒वतन्न दे॒व-
ता᳚भ्य॒ आ वृ॑श्च्यते॒ वसी॑यान् भवत्याग्ने॒य्या गा॑यत्रि॒या प्र॑थ॒माञ्चिति॑म॒भि मृ॑शेत् त्रि॒ष्टुभा᳚ द्वि॒तीया॒-
ञ्जग॑त्या तृ॒तीया॑मनु॒ष्टुभा॑ चतु॒र्थीम्प॒ङ्क्त्या प॑ञ्च॒मीय्यँ॑थादे॒वत॒मेवाग्निञ्चि॑नु॒ते न दे॒वता᳚भ्य॒ आ वृ॑श्च्यते॒
वसी॑यान् भ॒वतीडा॑यै॒ वा ए॒षा विभ॑क्तिः प॒शव॒ इडा॑ प॒शुभि॑रेनं ॥ [१] ॥ चिनु॒ते यो वै प्र॒जाप॑-
तये प्रति॒ प्रोच्या॒ग्निञ्चि॒नोति॒ नाऽऽर्ति॒माच्छ॒त्यश्वा॑व॒भित॑ स्तिष्ठेताङ्कृ॒ष्ण उ॑त्त॒रतः॑ श्वे॒तो द॑क्षि॒ण
स्तावा॒लभ्येष्ट॑का॒ उप॑ दद्ध्यादे॒तद्वै प्र॒जाप॑ते रू॒पम्प्रा॑जाप॒त्योऽश्वः॑ सा॒क्षादे॒व प्र॒जाप॑तये प्रति॒-
प्रोच्या॒ग्निञ्चि॑नोति॒ नाऽऽर्ति॒माच्छ॑त्ये॒तद्वा अह्नो॑ रू॒पय्यँ॑च् छ्वे॒तोऽश्वो॒ रात्रि॑यै कृ॒ष्ण ए॒तदह्नो॑
॥ [२] ॥ रू॒पय्यँदिष्ट॑का॒ रात्रि॑यै॒ पुरी॑ष॒मिष्ट॑का उपधा॒स्यञ्छ्वे॒तमश्व॑म॒भि मृ॑शे॒त् पुरी॑षमुपधा॒स्यन्
कृ॒ष्णम॑होरा॒त्राभ्या॑मे॒वैन॑ञ्चिनुते हिरण्यपा॒त्रम्मधो᳚ः पू॒र्णन्द॑दाति मधव्यो᳚ऽसा॒नीति॑ सौ॒र्या॑ चि॒त्रव॒-
त्याऽवे᳚क्षते चि॒त्रमे॒व भ॑वति म॒द्ध्यन्दि॒नेऽश्व॒मव॑ घ्रापयत्य॒सौ वा आ॑दि॒त्य इन्द्र॑ ए॒ष प्र॒जाप॑तिः
प्राजाप॒त्योऽ श्व॒स्तमे॒व सा॒क्षादृ॑द्ध्नोति ॥ [३] ॥

(ए॒न मे॒तदह्नो॒ ऽष्टाच॑त्वारिꣳशच्च) ॥ १ ॥

त्वाम॑ग्ने वृ॒षभञ्चेकि॑ता॒नम्पुन॒र् युवा॑नञ्ज॒नय॑न्नु॒पागा᳚म्। अ॒स्थू॒रि णो॒ गार्ह॑पत्यानि सन्तु ति॒ग्मेन॑
नो॒ ब्रह्म॑णा॒ सꣳ शिशा॑धि ॥ प॒शवो॒ वा ए॒ते यदिष्ट॑का॒ श्चित्याँ᳚चित्यामृष॒भमुप॑ दधाति मिथु॒नमे॒वास्य॒

तद्यज्ञे करोति प्रजननाय तस्माद्यूथेयूथ ऋषभः॥ सँव्वथ्सरस्य प्रतिमाय्ँयान्त्वा रात्र्युपासते। प्रजाꣳ सुवीराङ्कृत्वा विश्वमायुर् व्यश्ञवत्॥ प्राजापत्या ॥ [४] ॥ मेतामुप दधातीयव्ँवावैषे-काष्टका यदेवैकाष्टकायामन्नङ्क्रियते तदेवैतयाऽव रुन्ध एषा वै प्रजापतेः कामदुघा तयैव यज-मानोऽमुष्मिँल्लोकेऽग्निन्दुहे येन देवा ज्योतिषोद्ध्वा उदायन्न्येनाऽऽदित्या वसवो येन रुद्राः। येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति॥ सुवर्गाय वा एष लोकाय ॥ [५] ॥ चीयते यदग्निर् येन देवा ज्योतिषोद्ध्वा उदायन्नित्युख्यꣳ समिन्ध इष्टका एवैता उप धत्ते वान-स्पत्याः सुवर्गस्य लोकस्य समष्ट्यै शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे। शतय्ँयो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृ-थिवी वियन्ति॥ तेषाय्ँयो अज्यानिमजीतिमावहात् तस्मै नो देवाः ॥ [६] ॥ परि दत्तेह सर्वे॥ ग्रीष्मो हेमन्त उत नो वसन्तः शरद् वर्षाः सुवितन्नो अस्तु। तेषामृतूनाꣳ शतशारदानान्निवात एषामभये स्याम॥ इदुवथ्सराय परिवथ्सराय सँव्वथ्सराय कृणुता बृहन्नमः। तेषाव्ँवयꣳ सुमतौ यज्ञियानाञ्ज्योगजीता अहताः स्याम॥ भद्रान्नः श्रेयः समनैष्ट देवा स्त्वयाऽवसेन समशीमहि त्वा। स नो मयो भूः पितो ॥ [७] ॥ आ विशस्व शन्तोकाय तनुवे स्योनः॥ अज्यानीरेता उप दधात्येता वै देवता अपराजिता स्ता एव प्र विशति नैव जीयते ब्रह्मवादिनो वदन्ति यद-र्द्धमासा मासा ऋतवः सँव्वथ्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणन्नि-रुप्यत इत्येता हि तद्देवता उदजयन्न्यदृतुभ्यो निर्वपेद् देवताभ्यः समदन्दद्ध्यादाग्रयणन्निरु-प्यैता आहुतीर् जुहोत्यर्द्धमासानेव मासानृतून्थ् सँव्वथ्सरम्प्रीणाति न देवताभ्यः समदन्दधाति भद्रान्नः श्रेयः समनैष्ट देवा इत्याह हुताद्याय यजमानस्याऽपराभावाय ॥ [८] ॥

(प्राजापत्या लोकाय देवाः पितो दद्ध्यादाग्रयणं पञ्चविꣳशतिश्च) ॥ २ ॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्न स्तनूपा नः प्रतिस्पशः। यो नः पुरस्ताद् दक्षिणतः पश्चादु-त्तरतो ऽघायुरभिदासत्येतꣳ सोऽश्मानमृच्छतु॥ देवासुराः सय्ँयत्ता आसन् तेऽसुरा दिग्भ्य आऽबाधन्त तान् देवा इष्वा च वज्रेण चापानुदन्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षूप ॥ [९] ॥ दधाति देवपुरा एवैता स्तनूपानीः पर्यूहतेऽग्ना-

विष्णू सजोषसेमा वर्द्धन्तु वाङ्गिरः। द्युम्नैर् वाजेभिरा गतम्॥ ब्रह्मवादिनो वदन्ति यन्न देवतायै
जुह्वत्यथ किंदेवत्या वसोर् धारेत्यग्निर् वसु स्तस्यैषा धारा विष्णुर् वसु स्तस्यैषा धाराऽऽग्नावै-
ष्णव्यर्चा वसोर् धाराञ्जुहोति भागधेयेनैवैनौ समर्द्धयत्यथो एता ॥ [१०] ॥ मेवाहुतिमायत-
नवतीङ्करोति यत्काम एनाञ्जुहोति तदेवाव रुन्धे रुद्रो वा एष यदग्नि स्तस्यैते तनुवौ घोराऽन्या
शिवाऽन्या यच्छतरुद्रीयञ्जुहोति यैवास्य घोरा तनूस्तान्तेन शमयति यद्वसोर् धाराञ्जुहोति
यैवास्य शिवा तनूस्तान्तेन प्रीणाति यो वै वसोर् धारायै ॥ [११] ॥ प्रतिष्ठाव्वेँद प्रत्येव तिष्ठति
यदाज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनम्पचेत् तम्ब्राह्मणाश्चत्वारः प्राश्ञीयुरेष अग्निर् वैश्वानरो
यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायामेवैनान्तनुवाम्प्रति ष्ठापयति चतस्रो
धेनूर् दद्यात् ताभिरेव यजमानोऽमुष्मिँल्लोकेऽग्निन्दुहे ॥ [१२] ॥

(उपै तां धारायै षड्त्वारिꣳशच्च) ॥ ३ ॥

चित्तिञ्जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाऽऽ*हुतिर् वैश्वकर्मणी नैनञ्चिक्यानम्भ्रा-
तृव्यो दभ्नोत्यथो देवता एवाव रुन्धेऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्याऽऽहुत्या यज्ञमुखमा
रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाव रुन्धेऽग्निर् देवेभ्योऽपाक्रामद्भाग-
धेय ॥ [१३] ॥ मिच्छमान स्तस्मा एतद्भागधेयम्प्रायच्छन्नेतद् वा अग्नेरग्निहोत्रमेतर्हि खलु
वा एष जातो यर्हि सर्वश्चितो जातायैवास्मा अन्नमपि दधाति स एनम्प्रीतः प्रीणाति वसीयान्
भवति ब्रह्मवादिनो वदन्ति यदेष गार्हपत्य श्चीयतेऽथ क्वास्याऽऽहवनीय इत्यसावादित्य इति
ब्रूयादेतस्मिन्हि सर्वाभ्यो देवताभ्यो जुह्वति ॥ [१४] ॥ य एवव्विद्वानग्निञ्चिनुते साक्षादेव
देवता ऋध्नोत्यग्ने यशस्विन्यशसेममर्पयेन्द्रावती मपचितीमिहाऽऽवह। अयम्मूर्द्धा परमेष्ठी
सुवर्चाः समानानामुत्तमश्लोको अस्तु॥ भद्रम्पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः।
ततः क्षत्रम्बलमोजश्च जातन्तदस्मै देवा अभि सन्नमन्तु॥ धाता विधाता परमो ॥ [१५] ॥
त सन्दृक् प्रजापतिः परमेष्ठी विराजा। स्तोमा श्छन्दाꣳसि निविदो म आहुरेतस्मै राष्ट्रमभि
सन्नमाम॥ अभ्यावर्तध्वमुप मेत साकमयꣳ शास्ताऽधिपतिर् वो अस्तु। अस्य विज्ञानमनु

सꣳ रभद्ध्वमिमम्पश्चादनु जीवाथ सर्वे॥ राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चिती राष्ट्रभृत् तयैवास्मिन् राष्ट्रन्दधाति राष्ट्रमेव भवति नास्माद् राष्ट्रम्भ्रꣳशते ॥ [१६] ॥

(भागधेयं ꣳ जुह्वति परमा राष्ट्रन्दधाति सप्त च) ॥ ४ ॥

---

यथा वै पुत्रो जातो म्रियत एवँव्वा एष म्रियते यस्याग्निरुख्य उद्वायति यन्निर्मन्थ्यं कुर्याद्विच्छिन्द्याद्भ्रातृव्यमस्मै जनयेथ् स एव पुनः परीद्ध्यः स्वादेवैनय्यँोनेर् जनयति नास्मै भ्रातृव्यञ्जनयति तमो वा एतङ्गृह्णाति यस्याग्निरुख्य उद्वायति मृत्युस्तमः कृष्णँव्वासः कृष्णा धेनुर् दक्षिणा तमसै ॥ [१७] ॥ व तमो मृत्युमप हते हिरण्यन्ददाति ज्योतिर् वै हिरण्यञ्ज्योतिषैव तमोऽप हतेऽथो तेजो वै हिरण्यन्तेज एवाऽऽत्मन् धत्ते सुवर् न घर्मः स्वाहा सुवर् नाऽर्कः स्वाहा सुवर् न शुक्रः स्वाहा सुवर् न ज्योतिः स्वाहा सुवर् न सूर्यः स्वाहाऽर्को वा एष यदग्निरसावादित्यो ॥ [१८] ॥ ऽश्वमेधो यदेता आहुतीर् जुहोत्यर्काश्वमेधयोरेव ज्योतीꣳषि सन्दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत आपो वा इदमग्रे सलिलमासीथ् स एताम्प्रजापतिः प्रथमाञ्चितिमपश्यत् तामुपाधत्त तदियमभवत् तँव्विश्वकर्माऽब्रवीदुप त्वाऽऽ*यानीति नेह लोकोऽस्तीत्य ॥ [१९] ॥ ब्रवीथ् स एतान्द्वितीयाञ्चितिमपश्यत् तामुपाधत्त तदन्तरिक्षमभवथ् स यज्ञः प्रजापतिमब्रवीदुप त्वाऽऽ*यानीति नेह लोकोऽस्तीत्यब्रवीथ् स विश्वकर्माणमब्रवीदुप त्वाऽऽ*यानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत् तन्दिश्याभिरुपैत् ता उपाधत्त ता दिशो ॥ [२०] ॥ ऽभवन्थ् स परमेष्ठी प्रजापतिमब्रवीदुप त्वाऽऽ*यानीति नेह लोकोऽस्तीत्यब्रवीथ् स विश्वकर्माणञ्च यज्ञञ्चाब्रवीदुप वामाऽयानीति नेह लोकोऽस्तीत्यब्रूताꣳ स एतान्तृतीयाञ्चितिमपश्यत् तामुपाधत्त तदसावभवथ् स आदित्यः प्रजापतिमब्रवीदुप त्वा ॥ [२१] ॥ ऽऽ*यानीति नेह लोकोऽस्तीत्यब्रवीथ् स विश्वकर्माणञ्च यज्ञञ्चाब्रवीदुप वामाऽयानीति नेह लोकोऽस्तीत्यब्रूताꣳ स परमेष्ठिनमब्रवीदुप त्वाऽऽ*यानीति केन मोपैष्यसीति लोकंपृणयेत्यब्रवीत् तल्लोँकंपृणयोपैत् तस्मादयातयाम्नी लोकंपृणाऽयातयामा ह्यसा ॥ [२२] ॥ वादित्य स्तानृषयोऽब्रुवन्नुप व आऽयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन् तान् द्वाभ्याञ्चितीभ्यामुपायन्थ्

स पञ्चचितीकः समपद्यत य एवं विद्वानग्निं चिनुते भूयानेव भवत्यभीमाँल्लोकाञ्जयति विदुरेनन्देवा अथो एतासामेव देवतानाꣳ सायुज्यङ्गच्छति ॥ [२३] ॥

(तमसा ऽऽदित्यो ऽस्तीति दिश आदित्यः प्रजापति मब्रवीदुप त्वा ऽसौ पञ्चचत्वारिꣳशच्च) ॥ ५ ॥

वयो वा अग्निर् यदग्निचित् पक्षिणोऽश्नीयात् तमेवाग्निमद्यादार्तिमार्च्छेथ् सँव्वथ्सरव्व्रतं चरेथ् सँव्वथ्सरꣳ हि व्रतन्नाति पशुर् वा एष यदग्निर्हिनस्ति खलु वै तम्पशुर् य एनं पुरस्तात् प्रत्यञ्चमुपचरति तस्मात् पश्चात् प्राङुपचर्य आत्मनोऽहिꣳसायै तेजोऽसि तेजो मे यच्छ पृथिवी-य्यँच्छ ॥ [२४] ॥ पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर् मे यच्छान्तरिक्षय्यँच्छान्तरिक्षान्मा पाहि सुवरसि सुवर् मे यच्छ दिवय्यँच्छ दिवो मा पाहीत्याहैताभिर् वा इमे लोका विधृता यदेता उपदधात्येषाँल्लोकानाव्विँधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उपदधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर् हिरण्यय्यँथ् स्वयमातृण्णा उपधाय ॥ [२५] ॥ हिरण्येष्टका उपदधा-तीमानेवैताभिर् लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्र भान्ति यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः। ताभिः सर्वाभी रुचे जनाय न स्कृधि॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभी रुचन्नो धत्त बृहस्पते॥ रुचन्नो धेहि ॥ [२६] ॥ ब्राह्मणेषु रुचꣳ राजसु न स्कृधि। रुचव्विँश्येषु शूद्रेषु मयि धेहि रुचा रुचम्। द्वेधा वा अग्निञ्चिक्यानस्य यश इन्द्रियं गच्छत्यग्निव्वाँ चितमीजानव्वाँ यदेता आहुतीर् जुहो-त्यात्मन्नेव यश इन्द्रियन्धत्त ईश्वरो वा एष आर्तिमार्तोर्योऽग्निञ्चिन्वन्नधिक्रामतितत् त्वा यामि ब्रह्मणा वन्दमान इति वारुण्यर्चा ॥ [२७] ॥ जुहुयाच्छान्तिरेवैषाऽग्नेर् गुप्तिरात्मनो हविष्कृतो वा एष योऽग्निञ्चिनुते यथा वै हविः स्कन्दत्येवव्वाँ एष स्कन्दति योऽग्निञ्चित्वा स्त्रियमुपैति मैत्रा-वरुण्याऽऽमिक्षया यजेत मैत्रावरुणतामेवोपैत्यात्मनोऽस्कन्दाय यो वा अग्निमृतुस्थाव्वेँदर्तु-र्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति सँव्वथ्सरो वा अग्निर् ॥ [२८] ॥ ऋतुस्थास्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्तरः पक्षो हेमन्तो मद्ध्यम्पूर्व-पक्षाश्चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका एष वा अग्निर्ऋतुस्था य एवव्वेँदर्तुर्ऋतुरस्मै

कल्पमान एति प्रत्येव तिष्ठति प्रजापतिर् वा एतञ्ज्यैष्ठ्यकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छद्य एवँविद्वानग्निञ्चिनुते ज्यैष्ठ्यमेव गच्छति ॥ [२९] ॥

(पृथिवीय्यँच्छ यथ् स्वयमातृण्णा उपधार्य धेह्यु चा ऽग्नि श्चिनुते त्रीणि च) ॥ ६ ॥

---

यदाकूताथ् समसुस्रोद्धृदो वा मनसो वा संभृतञ्चक्षुषो वा। तमनु प्रेहि सुकृतस्य लोकय्यँत्रर्षयः प्रथमजा ये पुराणाः॥ एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिञ्जातवेदाः। अन्वागन्ता यज्ञपतिर् वो अत्र तꣳ स्म जानीत परमे व्योमन्॥ जानीतादेनम्परमे व्योमन् देवाः सधस्था विद रूपमस्य। यदागच्छात् ॥ [३०] ॥ पथिभिर् देवयानैरिष्टापूर्ते कृणुतादाविरस्मै॥ सम्प्र च्यवद्ध्वमनु सम्प्र याताग्ने पथो देवयानान् कृणुद्ध्वम्। अस्मिन्थ् सधस्थे अद्ध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥ प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमय्यँज्ञन्नो वह सुवर् देवेषु गन्तवे॥ यदिष्टय्यँत् परादानय्यँद्दत्तय्याँ च दक्षिणा। त ॥ [३१] ॥ दग्निर् वैश्वकर्मणः सुवर् देवेषु नो दधत्॥ येना सहस्रव्वँहसि येनाग्ने सर्ववेदसम्। तेनेमय्यँज्ञन्नो वह सुवर् देवेषु गन्तवे॥ येनाग्ने दक्षिणा युक्ता यज्ञव्वँहन्त्यृत्विजः। तेनेमय्यँज्ञन्नो वह सुवर् देवेषु गन्तवे॥ येनाग्ने सुकृतः पथा मधोर् धारा व्यानशुः। तेनेमय्यँज्ञन्नो वह सुवर् देवेषु गन्तवे॥ यत्र धारा अनपेता मधोर् घृतस्य च याः। तदग्निर् वैश्वकर्मणः सुवर् देवेषु नो दधत् ॥ [३२] ॥

(वह सुवर् देवेषु गन्तवे चतुर्दश च) ॥ ७ ॥

---

या स्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः। ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानञ्चिनुहि प्रजानन्॥ उथ्सन्नयज्ञो वा एष यदग्निः किव्वाँऽहैतस्य क्रियते किव्वाँ न यद्वा अद्ध्वर्युरग्नेश्चिन्वन्न न्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि ॥ [३३] ॥ धामेत्याहैषा वा अग्नेः स्वयञ्चितिरग्निरेव तदग्निञ्चिनोति नाद्ध्वर्युरात्मनोऽन्तरेति चतस्र आशाः प्रचरन्त्वग्नय इमन्नो यज्ञन्नयतु प्रजानन्। घृतम्पिन्वन्नजरꣳ सुवीरम्ब्रह्म समिद्भवत्याहुतीनाम्॥

सुवर्गाय वा एष लोकायोप धीयते यत् कूर्मश्चतस्र आशाः प्र चरन्त्वग्नय इत्याह ॥ [३४] ॥ दिश एवैतेन प्र जानातीमन्नो यज्ञन्नयतु प्रजानन्नित्याह सुवर्गस्य लोकस्याभिनीत्यै ब्रह्म समिद्धवत्याहुतीनामित्याह ब्रह्मणा वै देवाः सुवर्गँल्लोकमायन्यद्ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्यजमानः सुवर्गँल्लोकमेति प्रजापतिर् वा एष यदग्निस्तस्य प्रजाः पशव श्छन्दाꣳसि रूपꣳ सर्वान्वर्णानिष्टकानाङ्कुर्याद् रूपेणैव प्रजाम्पशून् छन्दाꣳस्यव रुन्धेऽथो प्रजाभ्य एवैनम्पशुभ्य श्छन्दोभ्योऽवरुद्ध्य चिनुते ॥ [३५] ॥

(यान्त्यग्नय इत्याहेष्टकानाꣳ षोडश च) ॥ ८ ॥

मयि गृह्णाम्यग्रे अग्निꣳ राय स्पोषाय सुप्रजास्त्वाय सुवीर्याय। मयि प्रजाम्मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः॥ यो नो अग्निः पितरो हृथ्स्वन्तरमर्त्यो मर्त्याꣳ आविवेश। तमात्मन् परि गृह्णीमहे वयम्मा सो अस्माꣳ अवहाय परा गात्॥ यदद्ध्वर्युरात्मन्नग्निमगृहीत्वाऽग्निञ्चिनुयाद्योऽस्य स्वोऽग्नि स्तमपि ॥ [३६] ॥ यजमानाय चिनुयादग्निङ्खलु वै पशवोऽनूप तिष्ठन्तेऽपक्रामुका अस्मात् पशवः स्युर् मयि गृह्णाम्यग्रे अग्निमित्याहाऽऽत्मन्नेव स्वमग्निन्दाधार नास्मात् पशवोऽप क्रामन्ति ब्रह्मवादिनो वदन्ति यन्मृच्चाऽऽप श्चाग्नेरनाद्यमथ कस्मान्मृदा चाद्भि श्चाग्नि श्चीयत इति यदद्भिः सय्ँयौ ॥ [३७] ॥ त्यापो वै सर्वा देवता देवताभिरेवैनꣳ सꣳ सृजति यन्मृदा चिनोतीयव्ँवा अग्निर् वैश्वानरोऽग्निनैव तदग्निञ्चिनोति ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भि श्चाग्नि श्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभि श्चिनोत्यग्नयो वै छन्दाꣳसि तस्मादग्निरुच्यतेऽथो इयव्ँवा अग्निर् वैश्वानरो य ॥ [३८] ॥ न्मृदा चिनोति तस्मादग्निरुच्यते हिरण्येष्टका उप दधाति ज्योतिर् वै हिरण्यञ्ज्योतिरेवाऽस्मिन् दधात्यथो तेजो वै हिरण्यन्तेज एवाऽऽत्मन् धत्ते यो वा अग्निꣳ सर्वतोमुखञ्चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयति गायत्रीम्पुरस्तादुप दधाति त्रिष्टुभन्दक्षिणतो जगतीम्पश्चादनुष्टुभमुत्तरतः पङ्क्तिम्मद्ध्य एष वा अग्निः सर्वतोमुखस्तय्ँय एवव्ँविद्वाꣳ श्चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयत्यथो दिश्येव दिशम्प्र वयति तस्माद्दिशि दिक् प्रोता ॥ [३९] ॥

(अपि सय्ँयौतिवैश्वानरो य देष वै पञ्चविꣳशतिश्च) ॥ ९ ॥

प्रजापतिरग्निमसृजत सोऽस्माथ् सृष्टः प्राङ् प्राऽद्रवत् तस्मा अश्वम्प्रत्यास्यथ् स दक्षिणा ऽऽ*वर्तत तस्मै वृष्णिम्प्रत्यास्यथ् स प्रत्यङ्ङाऽवर्तत तस्मा ऋषभम्प्रत्यास्यथ् स उदङ्ङाऽवर्तत तस्मै बस्तम्प्रत्यास्यथ् स ऊर्द्ध्वोऽद्रवत् तस्मै पुरुषम्प्रत्यास्यद्यत् पशुशीर्षाण्युपदधाति सर्वत एवैन ॥ [४०] ॥ मवरुद्ध्य चिनुत एता वै प्राणभृतश्चक्षुष्मतीरिष्टका यत् पशुशीर्षाणि यत् पशुशीर्षा ण्युपदधाति ताभिरेव यजमानोऽमुष्मिँल्लोके प्राणित्यथो ताभिरेवास्मा इमे लोकाः प्र भान्ति मृदाऽभिलिप्योप दधाति मेद्ध्यत्वाय पशुर् वा एष यदग्निरन्नम्पशव एष खलु वा अग्निर् यत् पशुशीर्षाणि यङ्कामयेत कनीयोऽस्यान्नꣳ ॥ [४१] ॥ स्यादिति सन्तरान्तस्य पशुशीर्षाण्युप दद्ध्यात् कनीय एवास्यान्नम्भवति यङ्कामयेत समाव दस्यान्नꣳ स्यादिति मद्ध्यत स्तस्योप दद्ध्याथ् समावदेवास्यान्नम्भवति यङ्कामयेत भूयोऽस्याऽन्नꣳ स्यादित्यन्तेषु तस्य व्युदू-ह्योप दद्ध्यादन्तत एवास्मा अन्नमव रुन्धे भूयोऽस्यान्नं भवति ॥ [४२] ॥

(एन मस्यान्नं भूयोऽस्याऽन्नम्भवति) ॥ १० ॥

स्तेगान् दꣳष्ट्राभ्याम्मण्डूकान् जंभ्येभिरादकांखादेनोर्जꣳ सꣳ सूदेनारण्यञ्जांबीलेन मृदं बस्वेभिः शर्कराभिरवकामवकाभिः शर्करामुथ्सादेन जिह्वामवक्रन्देन तालुꣳ सरस्वतीञ्जिह्वा-ग्रेण ॥ [४३] ॥

(स्तेगान् द्वाविꣳशतिः) ॥ ११ ॥

वाजꣳ हनूभ्यामप आस्येनाऽऽदित्याञ् छ्मश्रुभिरुपयाममधरेणोष्ठेन सदुत्तरेणान्तरेणा नूकाशम्प्रकाशेन बाह्यꣳ स्तनयित्नुन्निर्बाधेन सूर्याग्नी चक्षुर्भ्याँविद्युतौ कनानकाभ्यामशनिम्म-स्तिष्केण बलम्मज्जभिः ॥ [४४] ॥

(वाजं पञ्चविꣳशतिः) ॥ १२ ॥

कूर्मांञ्छफैरच्छलाभिः कपिञ्जलान्थ् साम कुष्ठिकाभिर् जवञ्जङ्घाभिरगदञ्जानुभ्याँव्वीर्यं कुहा-
भ्याम्भयम्प्रचालाभ्याङ्गुहोपपक्षाभ्यामश्विनावꣳसाभ्यामदितिꣳ शीर्ष्णा निर्ऋतिन्निर्जाल्मकेन
शीर्ष्णा ॥ [४५] ॥

(कूर्मान् त्रयोविꣳशतिः) ॥ १३ ॥

योक्त्रङ्गृद्ध्राभिर् युगमानतेन चित्तम्मन्याभिः संक्रोशान् प्राणैः प्रकाशेन त्वचम्पराका-
शेनान्तराम्मशकान् केशैरिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन रथमुष्णिहाभिः
॥ [४६] ॥

(योक्त्र मेकविꣳशतिः) ॥ १४ ॥

मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी शिखण्डाभ्यामिन्द्राबृहस्पती ऊरुभ्यामिन्द्राविष्णू अष्ठी-
वद्भ्याꣳ सवितारम्पुच्छेन गन्धर्वाञ्छेपेनाप्सरसो मुष्काभ्याम्पवमानम्पायुना पवित्रं पोत्राभ्या-
माक्रमणꣳ स्थूराभ्याम्प्रतिक्रमणङ्कुष्ठाभ्याम् ॥ [४७] ॥

(मित्रावरुणौ द्वाविꣳशतिः) ॥ १५ ॥

इन्द्रस्य क्रोडोऽदित्यै पाजस्यन्दिशाञ्जत्रवो जीमूतान् हृदयौपशाभ्यामन्तरिक्षम्पुरितता
नभ उदर्येणेन्द्राणीम्प्लीह्ना वल्मीकान् क्लोम्ना गिरीन् प्लाशिभिः समुद्रमुदरेण वैश्वानरम्भस्मना
॥ [४८] ॥

(इन्द्रस्य द्वाविंशतिः) ॥ १६ ॥

पूष्णो वनिष्ठुरन्धाहेः स्थूरगुदा सर्पान् गुदाभिर् ऋतून् पृष्टीभिर् दिवम्पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणान्द्वितीयाऽऽदित्यानान्तृतीयाऽङ्गिरसाञ्चतुर्थी साद्ध्यानाम्पञ्चमी विश्वेषान्देवानांꣳ षष्ठी ॥ [४९] ॥

(पूष्ण श्चतुर्विꣳशतिः) ॥ १७ ॥

ओजो ग्रीवाभिर् निर्ऋतिमस्थभिरिन्द्रꣳ स्वपसा वहेन रुद्रस्य विचलः स्कन्धोऽहोरात्रयोर् द्वितीयोऽर्द्धमासानान्तृतीयो मासाञ्चतुर्थ ऋतूनाम्पञ्चमः संवँथ्सरस्य षष्ठः ॥ [५०] ॥

(ओजो विꣳशतिः) ॥ १८ ॥

आनन्दन्नन्दथुना कामम्प्रत्यासाभ्याम्भयꣳ शितीमभ्याम्प्रशिषम्प्रशासाभ्याꣳ सूर्याचन्द्रमसौ वृक्याभ्याꣳ श्यामशबलौ मतस्नाभ्यावँव्युष्टिꣳ रूपेण निम्रुक्तिमरूपेण ॥ [५१] ॥

(आनन्दꣳ षोडश) ॥ १९ ॥

अहर् माꣳसेन रात्रिम्पीवसाऽपो यूषेण घृतꣳ रसेन श्यावँवसया दूषीकाभिर् ह्रादुनिमश्रुभिः पृष्वान्दिवꣳ रूपेण नख्षत्राणि प्रतिरूपेण पृथिवीञ्चर्मणा छवीञ्छव्योपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा ॥ [५२] ॥

(अहर् द्वाविꣳशतिः) ॥ २० ॥

अग्नेः पख्षतिः सरस्वत्यै निपख्षतिः सोमस्य तृतीयाऽपाञ्चतुर्थ्योषधीनाम्पञ्चमी संवँथ्सरस्य षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषान्देवानान्द्वादशी द्यावापृथिव्योः पार्श्वय्यँमस्य पाटूरः ॥ [५३] ॥

(अग्ने रेकान्नत्रिꣳशत्) ॥ २१ ॥

वायोः पक्ष्मतिः सरस्वतो निपक्ष्मतिश्चन्द्रमसस्तृतीया नक्षत्राणाञ्चतुर्थी सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पाणाꣳ सप्तम्यर्यम्णोऽष्टमी त्वष्टुर् नवमी धातुर् दशमीन्द्राण्या एकादश्यदित्यै द्वादशी द्यावापृथिव्योः पार्श्वय्यँम्यै पाटूरः ॥ [५४] ॥

(वायो रष्टाविꣳशतिः) ॥ २२ ॥

पन्थामनूवृग्भ्याꣳ सन्ततिꣳ स्नावन्याभ्याꣳ शुकान् पित्तेन हरिमाणय्यँक्ना हलीक्ष्णान् पाप-वातेन कूश्माञ्छकभिः शवर्तानूवध्येन शुनो विशसनेन सर्पाꣳल्लोहितगन्धेन वयाꣳसि पक्वगन्धेन पिपीलिकाः प्रशादेन ॥ [५५] ॥

(पन्थांद्वाविꣳशतिः) ॥ २३ ॥

क्रमैरत्यक्रमीद्वाजी विश्वैर् देवैर् यज्ञियैः सँविदानः। स नो नय सुकृतस्य लोकन्तस्य ते वयꣳ स्वधया मदेम ॥ [५६] ॥

(क्रमै रष्टादश) ॥ २४ ॥

द्यौ स्ते पृष्ठम्पृथिवी सधस्थमात्माऽन्तरिक्षꣳ समुद्रो योनिः सूर्य स्ते चक्षुर् वातः प्राण-श्चन्द्रमाः श्रोत्रम्मासाश्चार्द्धमासाश्च पर्वाण्यृतवोऽङ्गानि सँव्वथ्सरो महिमा ॥ [५७] ॥

(द्यौः पञ्चविꣳशतिः) ॥ २५ ॥

अग्निः पशुरासीत् तेनायजन्त स एतꣳल्लोकमजयद् यस्मिन्नग्निः स ते लोकस्तञ्जेष्यस्य-थाव जिघ्र वायुः पशुरासीत् तेनायजन्त स एतꣳल्लोकमजयद्यस्मिन् वायुः स ते लोकस्तस्मात्

त्वाऽन्तरेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत् तेनायजन्त स एतल्लोकमजयद् यस्मि न्नादित्यः स ते लोकस्तज्जेष्यसि यद्यवजिघ्रसि ॥ [५८] ॥

(यस्मि न्नष्टौ च) ॥ २६ ॥

## समाप्ति कोर्वैः

(यो वा अयथादेवत न्त्वामग्न इन्द्रस्य चित्ति यथा वै वयो वै यदाकूताद् यास्ते अग्ने मयि गृह्णामि प्रजापतिः सोऽस्माथ् स्तेगान् वाजं कूर्मान् योक्त्रं मित्रावरुणा विन्द्रस्य पूष्ण ओज आनन्द मह रग्नेर् वायोः पन्थां क्रमैर् द्यौस्ते ऽग्निः पशुरासीथ् षड् विꣳशतिः)
(यो वा एवाऽऽहुति मभवन् पृथिवि रवरुद्ध्या ऽऽनन्द मष्टौ पञ्चाशत्)
(यो वा अयथादेवतं यद्यवजिघ्रसि)
(सावित्राणि विष्णुमुखा उथ्सन्नयज्ञो देवासुरायदेकेन हिरण्यवर्णा यो वासप्त)

॥ हरिः ॐ ॥

पञ्चमकाण्डे सप्तमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| २६ | ५८ |

ॐ